श्रीमद् भागवत का यह सार
भगवद् भक्ति ही आधार

# શ્રી મદ્દ્ભાગવત રસિક કુટુંબ

## UG-11.14 - તૃતીય સોપાન



स्व धाम प्रस्थान को देखो हो रहे श्री कृष्ण तैयार।
उद्धृत किए उद्धव समक्ष अद्भुत अनमोल उद्गार।।

નારાયણં(ન્) નમસ્કૃત્ય, નરં(ઞ્) ચૈવ નરોત્તમમ્.

દેવીં(મ્) સરસ્વતીં(મ્) વ્યાસં(ન્), તતો જયમુદીરયેત્.

નામસઙ્કીર્તનં(મ્) યસ્ય, સર્વપાપપ્રણાશનમ્.

પ્રણામો દુ:ખશમનસ્, તં(ન્) નમામિ હરિં(મ્) પરમ્.

### શ્રીમદ્ભાગવતમહાપુરાણમ્

### એકાદશ: સ્કન્ધ:

### .. અથ ચતુર્દશોऽધ્યાયઃ - ૧૪ ..

**ઉદ્ધવ ઉવાચ**

વદન્તિ કૃષ્ણ શ્રેયાં(વ્)સિ, બહૂનિ બ્રહ્મવાદિનઃ .

તેષાં(મ્) વિકલ્પપ્રાધાન્ય - મુતાહો એકમુખ્યતા .. ૧..

વિકલ્પ + પ્રાધાન્ય

ભવતોદાહૃતઃ(સ્) સ્વામિન્, ભક્તિયોગોऽનપેક્ષિતઃ .

નિરસ્ય સર્વતઃ(સ્) સં(ઙ્)ગં(મ્), યેન ત્વય્યાવિશેન્મનઃ .. ૨..

ભવતો + દાહૃતઃ(સ્),ભક્તિયોગોऽ + નપેક્ષિતઃ ,
ત્વય્યા + વિશેન્ + મનઃ

श्रीभगवानुवाच

કાલેન નષ્ટા પ્રલયે, વાણીયં(મ્) વેદસં(ગ્)જ્ઞિતા .

મયાऽऽદૌ બ્રહ્મણે પ્રોક્તા, ધર્મો યસ્યાં(મ્) મદાત્મકઃ .. ૩..

તેન પ્રોક્તા ચ પુત્રાય, મનવે પૂર્વજાય સા .

તતો ભૃગ્વાદયોऽગૃહ્ણન્, સપ્ત બ્રહ્મમહર્ષયઃ .. ૪..

ભૃગ્વા + દયોऽ + ગૃહ્ + ણન્

તેભ્યઃ(ફ્) પિતૃભ્યસ્તત્પુત્રા, દેવદાનવગુહ્યકાઃ .

મનુષ્યાઃ(સ્) સિદ્ધગન્ધર્વાઃ(સ્) સવિદ્યાધરચારણાઃ .. ૫..

પિતૃભ્યસ્ + તત્પુત્રા , દેવ + દાનવ + ગુહ્યકાઃ , સવિદ્યા + ધરચારણાઃ

કિં(ન્)દેવાઃ(ખ્) કિન્નરા નાગા, રક્ષઃ(ખ્) કિમ્પુરુષાદયઃ .

બહ્વ્યસ્તેષાં(મ્) પ્રકૃતયો, રજઃ(સ્)સત્ત્વતમોભુવઃ .. ૬..

કિમ્ + પુરુષાદયઃ , બહ્ + વ્યસ્ + તેષાં(મ્)
રજઃ(સ્) + સત્ + ત્વતમો + ભુવઃ

યાભિર્ભૂતાનિ ભિદ્યન્તે, ભૂતાનાં(મ્) મતયસ્તથા .

યથાપ્રકૃતિ સર્વેષાં(ગ્) ચિત્રા વાચઃ(સ્) સ્રવન્તિ હિ .. ૭..

યાભિર્ + ભૂતાનિ

એવં(મ્) પ્રકૃતિવૈચિત્ર્યાદ્, ભિદ્યન્તે મતયો નૃણામ્ .

પારમ્પર્યેણ કેષાઞ્ચિત્, પાખણ્ડમતયોऽપરે .. ૮..

પ્રકૃતિ + વૈચિત્ર્યાદ્ , પારમ્ + પર્યેણ , પાખણ્ડ + મતયોऽ + પરે

મન્માયામોહિતધિયઃ(ફ્), પુરુષાઃ(ફ્) પુરુષર્ષભ .

શ્રેયો વદન્ત્યનેકાન્તં(મ્), યથાકર્મ યથારુચિ .. ૯..

મન્માયા + મોહિત + ધિયઃ(ફ્), વદન્ત્ય + નેકાન્તં(મ્)

ધર્મમેકે યશશ્ચાન્યે, કામં(મ્) સત્યં(ન્) દમં(મ્) શમમ્ .
અન્યે વદન્તિ સ્વાર્થં(મ્) વા, ઐશ્વર્યં(ન્) ત્યાગભોજનમ્ .. ૧૦..

યશશ્ + ચાન્યે

કેચિદ્ યજ્ઞતપોદાનં(મ્), વ્રતાનિ નિયમાન્ યમાન્ .
આદ્યન્તવન્ત એવૈષાં(મ્), લોકાઃ(ખ્) કર્મવિનિર્મિતાઃ .
દુઃખોદર્કાસ્તમોનિષ્ઠાઃ(હ્), ક્ષુદ્રાનન્દાઃ(શ્) શુચાર્પિતાઃ .. ૧૧..

દુઃખોદર્ + કાસ્ + તમોનિષ્ઠાઃ(હ્)

મય્યર્પિતાત્મનઃ(સ્) સભ્ય, નિરપેક્ષસ્ય સર્વતઃ .
મયાऽऽત્મના સુખં(મ્) યત્તત્, કુતઃ(સ્) સ્યાદ્ વિષયાત્મનામ્ .. ૧૨..

મય્યર્ + પિતાત્ + મનઃ(સ્), વિષયાત્ + મનામ્

અકિ(ઞ્)ચનસ્ય દાન્તસ્ય, શાન્તસ્ય સમચેતસઃ .
મયા સન્તુષ્ટમનસઃ(સ્) સર્વાઃ(સ્) સુખમયા દિશઃ .. ૧૩..

સન્તુષ્ટ + મનસઃ(સ્)

ન પારમેષ્ઠ્યં(ન્) ન મહેન્દ્રધિષ્ણ્યં(ન્)
ન સાર્વભૌમં(ન્) ન રસાધિપત્યમ્ .
ન યોગસિદ્ધીરપુનર્ભવં(મ્) વા,
મય્યર્પિતાત્મેચ્છતિ મદ્ વિનાન્યત્ .. ૧૪..

યોગસિદ્ધી + રપુનર્ + ભવં(મ્), મય્યર્ + પિતાત્ + મેચ્છતિ

ન તથા મે પ્રિયતમ, આત્મયોનિર્ન શં(ઙ્)કરઃ .
ન ચ સં(ઙ્)કર્ષણો ન શ્રીર્- નૈવાત્મા ચ યથા ભવાન્ .. ૧૫..

આત્મ + યોનિર્ + ન

નિરપેક્ષં(મ્) મુનિં(મ્) શાન્તં(ન્), નિર્વૈરં(મ્) સમદર્શનમ્ .
અનુવ્રજામ્યહં(ન્) નિત્યં(મ્) પૂયેયેત્યઙ્ઘ્રિરેણુભિઃ .. ૧૬..

અનુ + વ્રજામ્ + યહં(ન્) ,પૂયેયેત્ + યઙ્ઘ્રિરે + ણુભિઃ

**નિષ્કિઞ્ચના મય્યનુરક્તચેતસઃ(શ્),**

**શાન્તા મહાન્તોઽખિલજીવવત્સલાઃ .**

**કામૈરનાલબ્ધધિયો જુષન્તિ યત્,**

**તન્નૈરપેક્ષ્યં(ન્) ન વિદુઃ(સ્) સુખં(મ્) મમ .. ૧૭..**

મય્યનુ + રક્ત + ચેતસઃ(શ્), મહાન્તોઽ + ખિલ + જીવવત્સલાઃ ,
કામૈ + રનાલબ્ધ + ધિયો, તન્નૈ + રપેક્ષ્યં(ન્)

**બાધ્યમાનોઽપિ મદ્ભક્તો, વિષયૈરજિતેન્દ્રિયઃ .**

**પ્રાયઃ(ફ્) પ્રગલ્ભયા ભક્ત્યા, વિષયૈર્નાભિભૂયતે .. ૧૮..**

બાધ્ય + માનોઽપિ, વિષયૈ + રજિતેન્દ્રિયઃ, વિષયૈર્ + નાભિ + ભૂયતે

**યથાગ્નિઃ(સ્) સુસમૃદ્ધાર્ચિઃ(ખ્) કરોત્યેધાં(વ્)સિ ભસ્મસાત્ .**

**તથા મદ્વિષયા ભક્તિ- રુદ્ધવૈનાં(વ્)સિ કૃત્સ્નશઃ .. ૧૯..**

સુસમૃદ્ + ધાર્ચિઃ(ખ્), કરોત્યે + ધાં(વ્)સિ ,રુદ્ધવૈ + નાં(વ્)સિ

**ન સાધયતિ માં(મ્) યોગો, ન સાં(ઙ્)ખ્યં(ન્) ધર્મ ઉદ્ધવ .**

**ન સ્વાધ્યાયસ્તપસ્ત્યાગો, યથા ભક્તિર્મમોર્જિતા .. ૨૦..**

સ્વાધ્યા + યસ્તપસ્ + ત્યાગો, ભક્તિર્ + મમોર્ + જિતા

**ભક્ત્યાહમેકયા ગ્રાહ્યઃ(શ્), શ્રદ્ધયાઽઽત્મા પ્રિયઃ(સ્) સતામ્ .**

**ભક્તિઃ(ફ્) પુનાતિ મન્નિષ્ઠા, શ્વપાકાનપિ સમ્ભવાત્ .. ૨૧..**

ભક્ત્યા + હમેકયા, શ્વપાકા + નપિ

**ધર્મઃ(સ્) સત્યદયોપેતો, વિદ્યા વા તપસાન્વિતા .**

**મદ્ભક્ત્યાપેતમાત્માનં(ન્), ન સમ્યક્ પ્રપુનાતિ હિ .. ૨૨..**

સત્ય + દયોપેતો, મદ્ + ભક્ત્યા + પેત + માત્માનં(ન્)

**કથં(મ્) વિના રોમહર્ષં(ન્), દ્રવતા ચેતસા વિના .**

**વિનાઽઽનન્દાશ્રુકલયા, શુધ્યેદ્ ભક્ત્યા વિનાઽઽશયઃ .. ૨૩..**

વિનાऽऽ + નન્દા + શ્રુકલયા

**વાગ્ ગદ્ગદા દ્રવતે યસ્ય ચિત્તં(મ્)**

**રુદત્યભીક્ષ્ણં(મ્) હસતિ ક્વચિચ્ચ .**

**વિલજ્જ ઉદ્ગાયતિ નૃત્યતે ચ,**

**મદ્ભક્તિયુક્તો ભુવનં(મ્) પુનાતિ .. ૨૪..**

રુદત્ + યભીક્ષ્ણં(મ્), મદ્ + ભક્તિ + યુક્તો

**યથાગ્નિના હેમ મલં(ઞ્) જહાતિ,**

**ધ્માતં(મ્) પુનઃ(સ્) સ્વં(મ્) ભજતે ચ રૂપમ્ .**

**આત્મા ચ કર્માનુશયં(મ્) વિધૂય,**

**મદ્ભક્તિયોગેન ભજત્યથો મામ્ .. ૨૫..**

કર્મા + નુશયં(મ્)

**યથા યથાऽऽત્મા પરિમૃજ્યતેऽસૌ,**

**મત્પુણ્યગાથાશ્રવણાભિધાનૈઃ .**

**તથા તથા પશ્યતિ વસ્તુ સૂક્ષ્મં(ઞ્),**

**ચક્ષુર્યથૈવાં(ઞ્) જનસમ્પ્રયુક્તમ્ .. ૨૬..**

મત્ + પુણ્ય + ગાથા + શ્રવણા + ભિધાનૈઃ
ચક્ષુર્ + યથૈવાં(ઞ્) + જનસમ્ + પ્રયુક્તમ્

**વિષયાન્ ધ્યાયતશ્ચિત્તં(મ્) વિષયેષુ વિષજ્જતે .**

**મામનુસ્મરતશ્ચિત્તં(મ્), મય્યેવ પ્રવિલીયતે .. ૨૭..**

ધ્યાયતશ્ + ચિત્તં(મ્), મામનુસ્ + મરતશ્ + ચિત્તં(મ્)

**તસ્માદસદભિધ્યાનં(મ્), યથા સ્વપ્નમનોરથમ્ .**

**હિત્વા મયિ સમાધત્સ્વ, મનો મદ્ભાવભાવિતમ્ .. ૨૮..**

તસ્મા + દસદ + ભિધ્યાનં(મ્), સ્વપ્ન + મનોરથમ્, મદ્ + ભાવ + ભાવિતમ્

**સ્ત્રીણાં(મ્) સ્ત્રીસં(ઙ્)ગિનાં(મ્) સં(ઙ્)ગં(ન્), ત્યક્ત્વા દૂરત આત્મવાન્ .**

**ક્ષેમે વિવિક્ત આસીનશ્- ચિન્તયેન્મામતન્દ્રિતઃ .. ૨૯..**

ચિન્તયેન્ + મામ + તન્દ્રિતઃ

**ન તથાસ્ય ભવેત્ ક્લેશો, બન્ધશ્ચાન્યપ્રસં(ઙ્)ગતઃ .**

**યોષિત્સં(ઙ્)ગાદ્ યથા પું(વ્)સો, યથા તત્સં(ઙ્)ગિસં(ઙ્)ગતઃ .. ૩૦..**

બન્ધશ્ + ચાન્ય + પ્રસં(ઙ્)ગતઃ

**ઉદ્ધવ ઉવાચ**

**યથા ત્વામરવિન્દાક્ષ, યાદૃશં(મ્) વા યદાત્મકમ્ .**

**ધ્યાયેન્મુમુક્ષુરેતન્મે, ધ્યાનં(ન્) ત્વં(મ્) વક્તુમર્હસિ .. ૩૧..**

ત્વા + મર + વિન્દાક્ષ, ધ્યાયેન્ + મુમુક્ષુ + રેતન્મે

**શ્રીભગવાનુવાચ**

**સમ આસન આસીનઃ(સ્), સમકાયો યથાસુખમ્ .**

**હસ્તાવુત્સં(ઙ્)ગ આધાય, સ્વનાસાગ્રકૃતેક્ષણઃ .. ૩૨..**

સ્વનાસા + ગ્રકૃતે + ક્ષણઃ

**પ્રાણસ્ય શોધયેન્માર્ગં(મ્), પૂરકુમ્ભકરેચકૈઃ .**

**વિપર્યયેણાપિ શનૈ - રભ્યસેન્નિર્જિતેન્દ્રિયઃ .. ૩૩..**

પૂર + કુમ્ભ + કરેચકૈઃ, રભ્ય + સેન્ + નિર્ + જિતેન્દ્રિયઃ

**હૃધવિચ્છિન્નમોં(ઙ્)કારં(ઙ્), ઘણ્ટાનાદં(મ્) વિસોર્ણવત્ .**

**પ્રાણેનોદીર્ય તત્રાથ, પુનઃ(સ્) સં(વ્)વેશયેત્ સ્વરમ્ .. ૩૪..**

હૃધ + વિચ્ + છિન્ + નમોં(ઙ્)કારં(ઙ્), વિસોર્ + ણવત્ , પ્રાણેનો + દીર્ય

**એવં(મ્) પ્રણવસં(ય્)યુક્તં(મ્), પ્રાણમેવ સમભ્યસેત્ .**

**દશકૃત્વસ્ત્રિષવણં(મ્), માસાદર્વાગ્ જિતાનિલઃ .. ૩૫..**

પ્રણવ + સં(ય્)યુક્તં(મ્) , દશકૃત્ + વસ્ + ત્રિષવણં(મ્) , માસાદર્ + વાગ્

હૃત્પુણ્ડરીકમન્તઃ(સ્)સ્થ - મૂર્ધ્વનાલમધોમુખમ્ .

ધ્યાત્વોર્ધ્વમુખમુન્નિદ્ર - મષ્ટપત્રં(મ્) સકર્ણિકમ્ .. ૩૬..

હૃત્ + પુણ્ડરી + કમન્તઃ + સ્થ, મૂર્ + ધ્વનાલ + મધોમુખમ્
ધ્યાત્ + વોર્ધ્વ + મુખમુન્ + નિદ્ર

કર્ણિકાયાં(ન્) ન્યસેત્ સૂર્ય - સોમાગ્નીનુત્તરોત્તરમ્ .

વહ્નિમધ્યે સ્મરેદ્ રૂપં(મ્), મમૈતદ્ ધ્યાનમં(ઙ્)ગલમ્ .. ૩૭..

સોમાગ્ની + નુત્ + તરોત્ + તરમ્

સમં(મ્) પ્રશાન્તં(મ્) સુમુખં(ન્) દીર્ઘચારુચતુર્ભુજમ્ .

સુચારુસુન્દરગ્રીવં(મ્), સુકપોલં(મ્) શુચિસ્મિતમ્ .. ૩૮..

દીર્ઘ + ચારુ + ચતુર્ભુજમ્ , સુચારુ + સુન્દર + ગ્રીવં(મ્)

સમાનકર્ણવિન્યસ્તસ્ - ફુરન્મકરકુણ્ડલમ્ .

હેમામ્બરં(ઙ્) ઘનશ્યામં(મ્), શ્રીવત્સશ્રીનિકેતનમ્ .. ૩૯..

સમા + નકર્ણ + વિન્યસ્તસ્ , ફુરન્ + મકર + કુણ્ડલમ્
શ્રીવત્સ + શ્રીનિકેતનમ્

શં(ઙ્)ખચક્રગદાપદ્મ - વનમાલાવિભૂષિતમ્ .

નૂપુરૈર્વિલસત્પાદં(ઙ્), કૌસ્તુભપ્રભયા યુતમ્ .. ૪૦..

શં(ઙ્)ખ + ચક્ર + ગદા + પદ્મ , નૂપુરૈર્ + વિલસત્ + પાદં(ઙ્)

દ્યુમત્કિરીટકટક - કટિસૂત્રાં(ઙ્)ગદાયુતમ્ .

સર્વાં(ઙ્)ગસુન્દરં(મ્) હૃદ્યં(મ્), પ્રસાદસુમુખેક્ષણમ્ .

સુકુમારમભિધ્યાયેત્ - સર્વાં(ઙ્)ગેષુ મનો દધત્ .. ૪૧..

દ્યુમત્ + કિરીટ + કટક, પ્રસાદ + સુમુખે + ક્ષણમ્ , સુકુમા + રમભિ + ધ્યાયેત્

ઇન્દ્રિયાણીન્દ્રિયાર્થેભ્યો, મનસાઽઽકૃષ્ય તન્મનઃ .

બુદ્ધ્યા સારથિના ધીરઃ(ફ્), પ્રણયેન્મયિ સર્વતઃ .. ૪૨..

ઇન્દ્રિયા + ણીન્દ્રિ + યાર્થેભ્યો ,મનસાઽઽ + કૃષ્ય , પ્રણયેન્ + મયિ

તત્ સર્વવ્યાપકં(ઙ્) ચિત્ત - માકૃષ્યૈકત્ર ધારયેત્ .

નાન્યાનિ ચિન્તયેદ્ ભૂયઃ(સ્), સુસ્મિતં(મ્) ભાવયેન્મુખમ્ .. ૪૩..

માકૃષ્યૈ + કત્ર, ભાવયેન્ + મુખમ્

તત્ર લબ્ધપદં(ઙ્) ચિત્ત - માકૃષ્ય વ્યોમ્નિ ધારયેત્ .

તચ્ચ ત્યક્ત્વા મદારોહો, ન કિં(ઙ્) ચિદપિ ચિન્તયેત્ .. ૪૪..

એવં(મ્) સમાહિતમતિર્ - મામેવાત્માનમાત્મનિ .

વિચષ્ટે મયિ સર્વાત્મન્, જ્યોતિર્જ્યોતિષિ સં(ય્)યુતમ્ .. ૪૫..

મામેવાત્મા + નમાત્મનિ, જ્યોતિર્ + જ્યોતિષિ

ધ્યાનેનેત્થં(મ્) સુતીવ્રેણ, યું(ઞ્) જતો યોગિનો મનઃ .

સં(ય્)યાસ્યત્યાશુ નિર્વાણં(ન્), દ્રવ્યજ્ઞાનક્રિયાભ્રમઃ .. ૪૬..

ધ્યાને + નેત્થં(મ્) , સં(ય્)યાસ્ + યત્યાશુ , દ્રવ્ય + જ્ઞાન + ક્રિયાભ્રમઃ

ઇતિ શ્રીમદ્ભાગવતે મહાપુરાણે પારમહં(વ્)સ્યાં(મ્)

સં(વ્)હિતાયામેકાદશસ્કન્ધે ચતુર્દશોઽધ્યાયઃ .. ૧૪..

ૐ પૂર્ણમદઃ(ફ્) પૂર્ણમિદં(મ્) પૂર્ણાત્પૂર્ણમુદચ્યતે

પૂર્ણસ્ય પૂર્ણમાદાય પૂર્ણમેવાવશિષ્યતે.

ૐ શાન્તિઃ(શ્) શાન્તિઃ(શ્) શાન્તિઃ.

